श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

Please install **Sanskrit New font** to view this file in sanskrit script.

# । गोपाल विंशतिः ।

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि ॥

वन्दे बृन्दावन चरं वल्लवी जन वल्लभम् ।
जयन्ती संभवं धाम वैजयन्ती विभूषणम् ॥१

वाचां निजाङ्क रसिकां प्रसमीक्षमाणो
वक्त्रारविन्द विनिवेशित पाञ्चजन्यः ।
वर्ण त्रिकोण रुचिरे वर पुण्डरीके
बद्धासनो जयति वल्लव चक्रवर्ती ॥२

आम्नाय गन्धि रुदित स्फुरिताध रोष्टम्
आस्राविलेक्षण मनुक्षण मन्दहासम् ।
गोपाल डिम्भ वपुषं कुहना जनन्याः
प्राण स्तनन्धयमवैमि परं पुमांसम् ॥३

आविर्भवत् वनिभृताभरणम् पुरस्तात्
आकुञ्चितैक चरणं निभृतान्य पादम्
दध्ना निमन्थ मुखरेण निबध्द तालं
नाथस्य नन्द भवने नवनीत नाट्यम् ॥४

हर्तुं कुम्भे विनिहित करः स्वादु हैयङ्ग वीनं
दृष्ट्वा दाम ग्रहण चटुलां मातरं जात रोषाम् ।
पायादीषत् प्रचलित पदो नाप गच्छन् न तिष्ठन्



rmvenkat@yahoo.com

मिथ्यागोपः सपदि नयने मीलयन् विश्व गोप्ता ॥५

व्रज योषिदपाङ्ग वेधनीयं
मधुरा भाग्यम् अनन्य भोग्यमीडे।
वसुदेव वधू स्तनन्धयं तत्
किमपि ब्रह्म किशोर भव दृश्यम् ॥६

परिवर्तित कन्धरं भयेन
स्मित फुल्लाधर पल्लवं स्मरामि।
विटपित्व निरासकं कयोश्चित्
विपुलोलूखल कर्षकं कुमारम् ॥७

निकटेषु निशामयामि नित्यं
निगमन्तैरधुनाऽपि मृग्यमाणम्।
यमलार्जुन दृष्ट बाल केलिं
यमुना साक्षिक यौवनं युवानम् ॥८

पदवीम् अदवीयसीं विमुक्तेः
अटवी संपदम् अम्बु वाहयन्तीम्।
अरुणाधर साभिलाष वंशां
करुणां कारण मानुषीं भजामी ॥९

अनिमेष निषेवणीयमक्ष्णोः
अजहद्यौवन माविरस्तु चित्ते।
कलहायित कुन्तलं कलापैः
करणोन्मादक विभ्रमं महो मे ॥१०

अनुयायि मनोज्ञ वंश नालैः
अवतु स्पर्शित वल्लवी विमोहैः।
अनघ स्मित शीतलैरसौ माम्
अनुकम्पा सरिदम्बुजैरपाङ्गैः ॥११

अधराहित चारु वंश नालाः
मकुटालम्बि मयूर पिञ्छ मालाः।
हरिनील शिला विभङ्ग नीलाः
प्रतिभाः सन्तु मम अन्तिम प्रयाणे ॥१२

अखिला नवलोकयामि कालान्
महिलाधीन भुजान्तरस्य यूनः।
अभिलाष पदं व्रजाङ्ग नानाम्
अबिलापक्रम दूरमाभिरूप्यम् ॥१३

हृदि मुग्ध शिकण्ड मण्डनो
लिखितः केन ममैष शिल्पिना।
मदनातुर वल्लवाङ्गना
वदनाम्बोज दिवाकरो युवा ॥१४

महसे महिताय मौलिना
विनते नाञ्जलि मञ्जनत्विषे।
कलयामि विमुग्ध वल्लवी
वलयाभाषित मञ्जु वेणवे ॥१५

जयति ललित वृत्तिं शिक्षितो वल्लवीनां
शिथिल वलय शिञ्जा शीतलैर्हस्त तालैः।
अखिल भुवन रक्षा गोप वेषस्य विष्णोः
अधर मणि सुधायां अम्शवान् वंशनालः ॥१६

चित्राकल्पः श्रवसि कलयन् लाङ्गली कर्णपूरं
बर्होत्तंस स्फुरित चिकुरो बन्धुजीवं दधानः।
गुञ्जा बद्धा मुरसि ललितां धारयन् हार यष्टिं
गोप स्त्रीणां जयति कितवः कोऽपि कौमार हारी ॥१७

लीलायष्टिं कर किसलये दक्षिणे न्यस्य धन्याम्
अंसे देव्याः पुलक रुचिरे सन्निविष्टान्य बाहुः।

मेघ श्यामो जयति ललितो मेखला दत्त वेणुः
कुञ्जापीड स्फुरित चिकुरो गोपकन्या भुजङ्गः ॥१८

प्रत्यालीढ स्थितिमधिगतां प्राप्त गाढाङ्ग पालिं
पश्चा दीषन्मिलित नयनां प्रेयसीं प्रेक्षमाणः ।
भस्त्रा यन्त्र प्रणिहित करो भक्त जीवातु रव्यात्
वारि क्रीडा निबिड वसनो वल्लवी वल्लभो नः ॥१९

वासो हृत्वा दिनकर सुतासन्निधौ वल्लवीनां
लीलास्मेरो जयति ललिताम् आस्थितः कुन्द शाखाम् ।
सव्रीडाभिस्तदनु वसने ताभिरभ्यर्थ्य माने
कामि कश्चित् कर कमलयोर् अञ्जलिं याचमानः ॥२०

इत्यनन्य मनसा विनिर्मितां
वेङ्कटेश कविना स्तुतिं पठन्
दिव्य वेणु रसिकं समीक्षते
दैवतं किमपि यौवत प्रियम् ॥२१

कवितार्किक सिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः

---

Please send your comments and suggestions to R.Venkat



rmvenkat@yahoo.com